सूतजी ने कहा—इस प्रकार से म्लेच्छों की भार्या के साथ कलि के द्वारा भगवान् की स्तुति की गई थी। तब तो भक्तों पर प्यार करने वाले भगवान् हरि वहाँ साक्षात् प्राप्त हुए और उन्होंने कलि से कहा—देखो तुम्हारी भलाई के लिए युगोत्तम बहुत से रूप में धारण करके तुम्हारी इच्छा को पूर्ण करूँगा। आदम नाम वाला पुरुष तथा हव्यवती नाम वाली पत्नी थी।१६।१८। विष्णू कर्दम से म्लेच्छों के वंश के प्रवर्धन करने वाले उत्पन्न हुए थे। भगवान् हरि वहाँ अन्तर्धान हो गए और कलि आनन्द से संकुल हो गया था।१९। नीलाचल नामक पर्वत पर जाकर कुछ समय तक वास कराया था। वेदवान् का सुनन्द नाम वाला पुत्र उत्पन्न हुआ जो कि राजा हुआ था। उसने पिता के समान राज का शासन किया था किन्तु उसके कोई सन्तान नहीं हुई थी और वह निस्सन्तान मृत हो गया था। आर्य देश उस समय क्षीणता से युक्त हो गए थे तथा म्लेच्छ देश बलवान् हो रहे थे।२०।२१।

भविष्यति भृगुश्रेष्ठ तस्माच्च तुहिनाचलम।
गत्वा विष्णुं समाराध्य नमिष्यामो हरेः पदम्।२२
इति श्रुत्वा द्विजाः सर्वे नैमिषारण्यवासिनः।
अष्टाशीतसहस्राण गतास्ते तुहिनाचलम्।२३
विशालायां समासाद्य विष्णुगाथां प्रचक्षिरे।
इति व्यासेन कथियं वाक्यं कलिविशारदम्।
श्रोतारं सः मन कृत्वा भविष्यं समुदीरयत्।२४
मनः श्रृणु ततो गाथां भावीं सूतेन वर्णिताम्।
कलेर्युगस्य पूर्णां तां तच्छ्रुत्वा तृप्तिमावह युगे।२५
षोडशाब्दसहस्रे च शेषे तद्वापरे।
बहुकीर्तिमतो भूमिरार्यदेशस्य कीर्तिता।२६
क्वचिद्विप्राः स्मृता भूपा क्वचिद्राजन्यवंशजाः।
क्वचिद्वैश्याः क्वचिच्छूद्राः कुत्रचिद्वर्णसंकरा।२७
द्विशताष्टसहस्र द्वे शेषे तु द्वापरे युगे।
म्लेच्छदेशस्य या भूमिर्भविता कीर्तिमालिनी।२८

हे भृगुश्रेष्ठ ! उस स्थान से तुहिनाचल पर जाकर विष्णु की आराधना करके हरि के पद प्राप्त करेंगे। यह समस्त द्विज सुनकर जो कि नैमिष अरण्य में वास कर रहे थे, अस्सी हजार ऋषिगण तुहिनाचल पर चले गये थे। विशाला में पहुँचकर वे भगवान् विष्णु की गाथा करने लगे। यह व्यास ने कलिविशारद ने वाक्य कहा था। वहाँ उन्होंने इस प्रसंग में मन को श्रोता बनाकर भविष्य कहना आरम्भ किया था। व्यासजी ने कहा—हे मन ! तू अत्र श्रवण कर जो भावी गाथा सूत ने वर्णित की है। यह कलियुग की पूर्ण गाथा है। उसे सुनकर अपनी तृप्ति प्राप्त कर।२२।२५। सूतजी ने कहा—द्वापर युग के सहस्र वर्ष शेष रहने पर आर्य देश की भूमि बहुत अधिक कीर्ति वाली कही गई है।२६। कहीं तो विप्र भूप कहे गए हैं और कहीं पर क्षत्रिय वंश में उत्पन्न राजा कहे गए हैं। कहीं पर वैश्य वर्ण वाले भूप थे तो कहीं पर शूद्र राजा थे। कहीं पर वर्ण संकर भी भूप थे।२७। आठ हजार दो सौ वर्ष द्वापर के जब शेष रहे थे जो यह भूमि म्लेच्छ देश की कीर्तिमालिनी हो जायगी।२८।

इन्द्रियाणि दमित्वा यो ह्यात्मध्यानपरायणः।
तस्माद्दादमनामासो पत्नी हव्यवती स्मृता।२९
प्रदानगरस्यैव पूर्वभागे महावनम्।
ईश्वरेण कृतं रम्य चतुक्रोशायतं स्मृतम्।३०
पापवृक्षतले गत्वा पत्नीदर्शनतत्परः।
कलिस्तत्रा गतस्तूर्णं सर्परूपतहिकृतम्।३१
वंचिता तेन धूर्तेन विष्णवाशा भङ्गता गता।
खादित्वा तत्फलं रम्यं लोकमार्ग प्रदं पतिः।३२
उदुम्बरस्य पत्रं श्च ताभ्यां वाटवशनं कृतम्।
सुताः पुत्रस्ततो जातः सर्वम्लेच्छा बभूविरे।३३
त्रिशेत्त र नवशतं तस्यायुः परिकीर्तितम्।
फलनाँ हवनं कुर्वन्पत्न्या सह दिवं गतः।३४

तस्माज्जातः सुतः श्रेष्ठः श्वेतनामेति विश्रुतः ।
द्वादशोत्तरवर्षं च तस्यायुः परिकीर्तितम ।३५

जो आत्मा के ध्यान में ही परायण है उसने इन्द्रियों का दमन करके उससे यह आदम नाम वाला पुरुष हुआ और उसकी पत्नी हव्यवती नाम वाली कही गई है । प्रदान नगर के ही पूर्व भाग में महावन ईश्वर के द्वारा किया गया परम सुन्दर और चार कोस विस्तार वाला कहा गया है ।२६।३०। वहाँ पाप वृक्ष के नीचे जाकर पत्नी के दर्शन में तत्पर था । कलि वहाँ शीघ्र आ गया जो कि सर्प का रूप किए हुए था ।३१। उस धूर्त ने विष्णु की आज्ञा को वंचित कर दिया था और वह भंगता को प्राप्त हो गई । पति ने लोक मार्ग प्रद रम्य फल खाये । उन दोनों ने उदुम्बर के पत्तों से वायु का अशन किया था । इसके अनन्तर सुताव पुत्र हुए जो कि सबके सब म्लेच्छ हो गए थे ।३२।३३। नौ-सौ तीस वर्ष उसकी आयु बताई गई थी । फलों का हवन करता हुआ वह पत्नी के साथ दिव्य लोक को चला गया था । उससे श्वेत नाम वाला श्रेष्ठ पुत्र उत्पन्न हुआ था जो कि परम प्रसिद्ध था और उसकी आयु द्वादशोत्तर वर्ष बताई गई है ।३४।३५।

अनुहस्तस्य तनयः शतहीनं कृतं पदम् ।
कीनाशस्तस्य तनयः पितामहसमं पदम् ।३६
महल्ललस्तस्य सुतः पञ्चहीनं शत नव ।
तेन राज्यं कृतं तत्र तस्मान्मानगरं स्मृतम् ।३७
तस्माच्च विरदो जातो राज्यं षष्टयुत्तरं समाः ।
ज्ञेयं नवशतं तस्य स्वनाम्ना नगरं कृतम् ।३८
हनूकस्तस्य तनयो विष्णुभक्तिपरायणः ।
फलानां हवनं कुर्वंस्तत्व ह्यसि जयन्सदा ।३९
त्रिशत पञ्चषिष्टश्च राज्यं वर्षाणि तत्स्मृतम् ।
सदेहः स्वर्गमायातो म्लेच्छधर्मपरायणः ।४०

आचारश्च विवेकश्च द्विजता देवपूजनम्।
कृतान्येतानि तेनैव तस्मान्म्लेच्छः बुधैः ।४१
विष्णुभक्त्याग्निपूजा च ह्यहिंसा च तपो दमः।
धर्माण्येतानि मुनिभिम्लेच्छानां हि स्मृतानिवै ।४२

उसके पुत्र का नाम अनुह था जिसने शतहीन पद किया था। उसका पुत्र कीनाश हुआ जिसने अपने पितामह के तुल्य पद किया था। ।३६। महल्लल उसका पुत्र हुआ पाँच कम नौ सौ वर्ष तक जिसने वहाँ राज किया था। इसमे मानगर कहा गया है।३७। और फिर उससे विरद उत्पन्न हुआ था। इसने षष्टयुत्तर वर्ष पर्यन्त राज्य किया था। अर्थात् नौ सौ आठ समझना चाहिए। इसने अपने नाम से नगर किया था।३८। उसका पुत्र हनूक नामधारी हुआ जो विष्णु की भक्ति में परायण रहता था। यह फलों का हवन करता हुआ सदा सत्व को उत्पन्न किया करता था।३६। उसका राज करने का काल तीन सौ पैंसठ वर्ष कहा गया है। यह इसी देह के साथ स्वर्ग में आया था जो कि म्लेच्छ धर्म परायण था ।४०। आचार और विवेक, द्विजता और देव पूजन ये सब उसने ही की थी। इसलिए बुधों के द्वारा म्लेच्छ कहा गया है।४१। विष्णु की भक्ति, अग्नि पूजा, अहिंसा, तप, दम ये धर्म मुनियों ने म्लेच्छों के बताए हैं ।४२।

मतोच्छिलस्तस्य सुतो हनु कस्येव भार्गव।
राज्यं नवशतं तस्य सप्ततिश्च स्मृत समः ।४३
लोमकस्तस्य तनयो राज्यं सप्तशतं समाः।
सप्तसप्ततिरेवास्य तत्पश्चात्स्वर्गंति गतः ।४४
तस्माजातः सुतो न्यूहो निर्गं तस्तूह एव सः।
तस्मान्न्यूहः स्मृतः प्राज्ञै राज्यं पञ्जशतं कृतम् ।४५
सीमः शमश्च भावश्च त्रयः पुत्रा बभूविरे।
न्यूहः स्मृतो विष्णुभक्तस्सोऽहं ध्यानपरायणः ।४६
एकदा भगवान्विष्णु स्तत्स्वप्ने तु समागतः ।४७

वत्स न्यूह श्रृणुष्वेदं प्रलयः सप्तमेऽहनि ।
भविता त्वं जनैस्सार्धं नावमारुह्य सत्वरम् ।४८
जीवनं कुरु भक्तेंद्र सर्वश्रेष्ठो भविष्यसि ।
तथेति मत्वा स मुनिर्नावं कृत्वा सुपुष्टिताम् ।४९
हस्तत्रिशतलम्बां पञ्चाशद्धस्तविस्तृताम् ।
त्रिशद्धस्तोच्छ्रितां रम्यां सर्वजीवसमन्विताम् ।५०

इसका पुत्र मतोच्छिल हुआ था जो कि हनूक का ही था । हे भार्गव ! उसका राज्य करने का समय नौ सौ सत्तर वर्ष कहा गया है ।४३। उसका पुत्र लोमक नामधारी उत्पन्न हुआ था । उसका राजकाल सात सौ वर्ष कहा गया है । सतत्तर ही वर्ष ऊपर थे । इसके पश्चात् वह स्वर्गगति को प्राप्त हो गया था ।४४। उससे न्यूह नामक पुत्र उत्पन्न हुआ था । वह न्यूह ही निर्गत हुआ था । इसके प्राज्ञों के द्वारा कहा गया है । इसने पाँच सौ वर्ष तक राज किया था ।४५। सीम, शाम, और भाव ये तीन पुत्र हुए थे । न्यूह विष्णु का भक्त कहा गया है जोकि सोऽहं के ध्यान में परायण रहा करता था ।४६। एक बार भगवान विष्णु उसके स्वप्न में आ गए थे । और स्वप्न में ही विष्णू ने कहा— हे वत्स न्यूह ! यह मेरा वचन श्रवणु करलो आज से सातवें दिन में प्रलय होगा । तुम मनुष्यों के साथ नाव में शीघ्र समारोहरण करके जीवन की रक्षा करना । हे भक्तेन्द्र ! तू सर्वश्रेष्ठ हो जायगा । उस स्वप्न में दी गई आज्ञा को स्वीकार करके उसने सुपुष्टित नाव बनवाई थी जो तीन सौ हाथ लम्बी और पचास हाथ विस्तृत (चौड़ी) थी । यह तीस हाथ ऊँचीथी एव बहुत रम्य थी कि समस्त जीवोंसे समन्वित थी ।४७।५०

आरुह्यस्वकुलैस्सार्द्धं विष्णुध्यानपरोऽभवत् ।
सांवर्तको मेघगणो महेन्द्रेण समन्वितः ।५१
चत्वारिंशद्दिनान्येव महावृष्टिमकारयत् ।
सर्वं तु भारत वर्षं जलैःप्लाव्य तु सिंधवः ।५२
चत्वारो मिलिताः सर्वे विकालायां न चागताः ।
अष्टाशीतिसहस्राणि मुनियो ब्रह्मवादिनः ।५३

न्यूहश्च स्वकुलस्साधं शेषास्सवे विनाशिताः ।
तदा च मुनयस्सर्वे विष्णुमायां प्रतुष्टुवु ।५४

उस नौका पर अपने कुलों के साथ उसने समरोहण किया और विष्णु के ध्यान में तत्पर हो गया था । महेन्द्र के द्वारा समन्वित मांवर्त्तक मेघों के गण ने चालीस दिन में ही वहाँ महा वृष्टि कराई थी । यह सम्पूर्ण भारतवर्ष जलों से प्लावित होकर सिन्धु बन गया था ।५१।५२। चारों सागर मिल गये और विशाला में नहीं आये थे । अट्ठासी हजार मुनिगण वहाँ पर ब्रह्मवादको करने वाले उपस्थित थे।५३।और न्यूह अपने कुलों के साथ वहाँ था बाकी अन्य सब विनाशित हो गये थे । तब सब मुनिगण ने विष्णु भगवान की माया का स्तवन किया था ।५४।

नमो देव्यै महाकाल्यै देवाक्यं च नमोनमः ।
महालक्ष्म्यै विष्णुमात्रे राधा देव्यै नमोनमः ।५५
रेवत्यै पुष्पवत्यै च स्वर्णवत्यै नमोनमः ।
कामाक्षायै च मायायै नमो मात्रे नमोनमः ।५६
महावातप्रभावेण महा मेघरवेण च ।
जलधाराभिरुग्राभिर्भयं जातं हि दारुणम् ।५७
तस्माद्भयाद्भैरवि त्वमास्मान्संरक्ष किंकरान् ।
तदा प्रसन्ना सा देवी जलं शांतं तथा कृतम् ।५८
अब्दांतरे मही सर्वा स्थला भूत्वा प्रदृश्यते ।
आराच्च शिषिणा नांत हिमाद्र स्तटभूमयः ।५९
न्यू स्तत्र स्थितो नाव मारूह्य स्वकुलैस्सह ।
जलांते भूमिभागस्य तत्र वास करोति सः ।६०

मुनिगण ने कहा—महाकाली के लिये हम सबका नमस्कार है और देवकी के लिए नमस्कार है, बारम्बार नमस्कार है । महालक्ष्मी विष्णु की माता, राधा देवी के लिए बार-बार हमारा सबका नमस्कार है । ५५ । रेवती, पुष्पवती, स्वर्णवती के लिए नमस्कार है ।

कामाक्षा, माया माता के लिये बार-बार नमस्कार है ।५६। महान् वायु के प्रभाव से और इस महान् मेघों के गर्जन से तथा इन परम उग्र जल की धाराओं से दारुणभय उत्पन्न हो गया है। हे भैरवि ! इस भय से तू हम किंकरों की रक्षा कर। उस समय देवी प्रसन्न हो गई और उसने जल की वर्षा को शान्त कर दिया था ।५७।५८। एक ही वर्ष के अन्दर समस्त पृथ्वी स्थली होकर दिखाई देने लगी और शीघ्र ही हिमाद्रि की तटभूमि में शिषिणा नाम का एक स्थल है वहाँ पर अनेक कुलों के साथ नाव पर सवार होकर न्यूह वहाँ पर स्थित था। जल के अन्त में वह भूमि पर उतर आया था और निवास करता है ।५९।६०।

—:●:—

।। म्लेच्छ वंश वर्णन ।।

सांम्प्रतं वर्तते यो वै प्रलयांते मुनीश्वर।
दिव्यदृष्टिप्रभावेन ब्रूहि ततः परम् ।१
न्यूहो नाम स्मृतो म्लेच्छो विष्णुमोहं तदाकरोत् ।
तदा प्रसन्नो भगवान्स्तस्य वंशः प्रवर्द्धितः ।२
म्लेच्छभाषा कृता तेन वेदवाक्यपराङ्मुखा ।
कलेश्च वृद्धये ब्राह्मीं भाषां कृत्वाऽपशब्दगाम् ।३
न्यूहाय दत्तवान्देवो बुद्धिपो बुद्धिगः स्वयम् ।
विलोमं च कृतं नाम यूहेन त्रिसुतस्य वै ।४
सिमश्च हामश्च तथा याकूतो नाम विश्रुतः ।
ताकूतः सप्तपुत्रश्च जुम्रो माजूज एव सः ।५
मादी तथा यनानस्तूवलोमसकस्तथा ।
तीरासश्च तथा तेषां नामभिर्देश उच्यते ।६
तन्नाम्ना च स्मृता देशा यनाद्या य सुताः स्मृताः ।७
इलीशस्तरलीशश्च कित्तीहूदानिरुच्यते ।
चतुर्भिर्धामदेशास्तेषां तेषां प्रचक्रिरे ।८

इस अध्याय में न्यूह राजा के वंश का वर्णन है, म्लेच्छों की भाषा का विधान है और सिम, हाम, याकूल, जुत्र माजूल, मादि यूनान इलीशतरलीश, किस्ती हूदादि प्रभृति राज्य करने वाले म्लेच्छों का वर्णन किया जाता है। शौनकजी ने कहा—हे मुनीश्वर! इस प्रलय जल के अन्त में इस समय जो वर्त्तमान है। आप अपनी दिव्य दृष्टि के प्रभाव से जो ज्ञात है उसे इससे आगे बतलाइये।१। सूतजी ने कहा, न्यूह के नाम वाले म्लेच्छ ने उस समय में विष्णु से मोह किया था। तब भगवान ने प्रसन्न होकर उसके वंश को बढ़ा दिया था।२। उसने वेदों के वाक्यों के पराङ्मुख म्लेच्छों की भाषा की थी। और कलि की वृद्धि के लिये अपशब्दों के गमन करने वाली ब्राह्मी भाषा की थी।३। स्वयं बुद्धिग और बुद्धि के ईश देव ने वह भाषा न्यूह को दी थी। न्यूह ने तीनों पुत्रों के नाम को विलोम किया था।४। सिम हाम तथा याकूत नाम विश्रुत थे। याकूत, सत्यपुत्र, जुत्र माजूद भी वही थे। मादी तथा युनान तथा स्तूबलोम तक, तीरात उनके इस प्रकार से नामों का निर्देश किया गया था।५।६। जुत्रादश, कनाव्जश्व, रिफत, तजरु साये उनके नामों से देश कहे गये थे और यूनादि सुन कहे गये हैं।७। इलीश, तरलीक्ष, किस्ती और हूत इन चार-चार नामों से उनके देश बनाये गये थे अर्थात् उनके देशों के नाम रखे गये थे।८।

द्वितीयतनयाद्धमात्सुताश्चत्वार एव ते।
कुशो मिश्रश्च कूजश्च कनआस्तत्र नामाभिः।९
देशा प्रसिद्धा म्लेछानां कुशात्षट् तनयाः स्मृताः।
स वा चैव हवीलश्च सर्वतोरगमस्तथा।१०
सतथाबतिका नाम निमरुहो महाबलः।
तेषां पुत्राश्च कलनः सिनारोरक उच्यते।११
अक्वदो बाबुनश्चैव रसनादेशकाश्च ते।
श्रावयित्वा मुनीत्सूतो योगनिद्रावशां गतः।१२

द्विसहस्रे शताब्दान्ते बुद्धा पुनरथाब्रवीत् ।
सिमवंश प्रवक्ष्यामि सिमो ज्येष्ठः स भूपतिः ।१३
राज्यं पंचशत वर्षं तेन म्लेच्छेन सत्कृतम् ।
अर्कन्सदस्तस्य सुतश्चतुस्त्रिंशच्च राज्यकम् ।१४
चतुश्शत पुनर्ज्ञेयं सिंहलस्तत्तनयोऽभवत् ।
राजं तस्य स्मृतं तत्र षष्टयुत्तरचतुः शतम् ।१५

द्वितीय तनय धाम से वे ही चार पुत्र हुये थे। कुश, मिश्र, कूज और कनआं—ये उनके नाम थे।९। इस तरह से म्लेच्छों के देश प्रसिद्ध हुए थे। कुश के छः पुत्र कहे गये हैं। वह अथवा हवोल, सर्वं तोरगम, सबतिका, निमरुह, महाबल ये नाम उनके हुए थे। उनके पुत्र कलन और सिना रोरक कहे जाते हैं।१०।११। अकद, बाबुन, रसना देशक ये उनके नाम थे। इस प्रकार से सूतजी मुनिगण को सुना कर योग निद्रा के वशीभूत हो गये थे।१२। दो हजार सौ वर्षों के अन्त में वे बुद्ध हुये और इसके अनन्तर फिर उन्होने कहा अब मैं सिम के वंश का वर्णन करूँगा सिम सबसे बड़ा था अतएव वही राजा हुआ था।१३। उस म्लेच्छ ने पाँच सौ वर्ष पर्यन्त राज्य किया था। अकन्सद उसका पुत्र हुआ था। इसने चार सौ बीस वर्ष तक राज्य का शासन अपने हाथ में रखा था इसका एक पुत्र था जिसका नाम सिंहल हुआ था। इसका राज काल चार सौ साठ वर्ष पर्यन्त बताया है।१४।१५।

इब्रतस्य सुतोज्ञेयः पितुस्तुल्यं कृत पदम् ।
फलजस्तस्य तनयश्चत्वारिंशद्भूय शतम् ।१६
राजं कृतं तु तस्माच्च रऊ नाम सुतः स्मृतः ।
सप्तत्रिंशच्च द्विशतं तस्य राजं प्रकीर्तितम् ।१७
तस्माच्च जूजः उत्पन्नः पितुस्तुल्यं कृतं पदम् ।
नहूरस्तस्य तनयो वयः षष्टयुत्तरं शतम् ।
राजं चकार नृपतिर्बनशत्रून्विहिंसयन ।१८
ताहरस्तस्य तनयः पितुस्तुल्यं कृतं पदम् ।
तस्मात्पुत्रोऽविरामश्च नहूरो हारनस्त्रयः ।१९

एवं तेषां स्मृतां वंशा नाममात्रेण कीर्तिता: ।
सरस्वत्याश्च शापेन म्लेच्छभाषा महाधमा: ।२०
तेषां वृद्धि: कलौ चासीत्संक्षेपेण प्रकीर्तिता ।
संस्कृतस्यैव वाणी तु भारतं वर्षमूह्यताम् ।२१
अन्यखण्डे गता सैव म्लेच्छा ह्यानंदिनोऽभवन् ।
एवं ते विप्र कथितं विष्णुभक्तद्विजैस्सह ।२२

इसके पुत्र का नाम इवतस्य था जिसने अपने पिता के समान ही पद किया था। उसका पुत्र फजल हुआ था जिसने दो सौ चालीस ही वर्ष तक राज किया था। उसके रऊभमाधारी पुत्र की उत्पत्ति हुई थी उसके राज करने का समय दो सौ सैंतीस वर्ष बताया गया है ।१६।१७। उससे फिर भूज नामक पुत्र उत्पन्न हुआ था जिसने अपने पिता के समान ही अपना सब काम पूर्ण किया था। नहूर पुत्र हुआ जिसकी आयु एक सौ साठ की थी। इसने अपने बहुत सारे शत्रुओं का विनाश करते हुये राज का शासन चलाया था ।१८। ताहर नाम वाला उसका पुत्र उत्पन्न हुआ था जिसने अपने पिता के ही समान सभी कुछ कार्य करके पद को संभाला था। इससे अविराम नामधारी पुत्र उत्पन्न हुआ था और दूसरे नहूर एव हरान हुये थे। इस तरह तीन पुत्र थे ।१९। इस प्रकार से उनके वंश बताये गये हैं और उनके नाम मात्र से ही कहे गये हैं। म्लेच्छों की भाषा को भगवती सरस्वती का शाप हो गया। इसीलिये यह भाषा महा अधम भाषा कही जाती है ।२०। उनकी वृद्धि कलियुग में थी जो कि रति संक्षेप से कही गई है। संस्कृत ही की एक वाणी है जिससे भारतवर्ष प्रफुल्लित हो रहा है ।२१। अन्य खण्ड में गई वही भाषा म्लेच्छा हो गई क्योंकि म्लेच्छ लोगों ने ही उसका आनन्द लिया था। इस प्रकार से हे विप्र ! तुम्हारे आगे मैंने सब वर्णन कर दिया है जो कि विष्णु भगवान के परम भक्त द्विज हैं उनके साथ सबका पूर्ण वर्णन हुआ है ।२२।

तच्छ्रुत्वा मनुयस्सर्वे विशालायां निवासिन: ।
नर नारायण देवसम्पूज्य विनयान्विता: ।२३

ध्यान चक्रुर्मुदा मुक्ता द्विशतं परिवत्सरान् ।
तत्पश्चाद्बोधितास्सर्वे शौनकाद्या मुनीश्वराः ।२४
संध्यातर्पणदेवार्चाः कृत्वा ध्यात्वा जनार्दनम् ।
लोमहर्षणमासीन पप्रच्छुर्विनयान्विता ।२५
व्यासशिष्य महाभाग चिरं जीव महामते ।
सांप्रतं वर्तते यो वै राजा तन्मे वद प्रभो ।२६
त्रिसहस्राब्दसंप्राप्ते कलौ भार्गवदन ।
आवन्ते शङ्खनामाऽस्त्री सांप्रतं वर्तते नृपः ।२७
म्लेच्चछदेशे शकपतिरथ राज्यं करोति वै ।
शृणु तत्कारणं सर्वं यथा यस्य विवर्धनम् ।२८

श्री व्यासजी ने कहा–विशाला में निवास करने वाले समस्त मुनियों यह श्रवण करके नर-नारायण देव की पूजा की और परम विनय से अन्वित हुये ।२३। उन समस्त मुनियों ने परम आनन्द के साथ दो सौ वर्ष पर्यन्त ध्यान किया था इसके अनन्तर शौनकादि समस्त मुनीश्वरों को बोध प्राप्त हुआ था ।२४। संध्या, तर्पण और देवताओं की अर्चा करके तथा भगवान जनार्दन का ध्यान करके विनय से युक्त होकर उन मुनियों ने बैठे हुये सूतजी से पूछा था ।२५। हे व्यासजी के शिष्य ! हे महान् भाग्य वाले ! हे महामते ! आप चिरकाल तक जीवित रहे । हे प्रभो ! इस समय में जो राजा विद्यमान हो उसके विषय में हमको बताने की कृपा करें ।२६। सूतजी ने कहा–हे भार्गवनन्दन ! तीन सहस्र वर्ष कलियुग के सम्प्राप्त होने पर इस समय में आवन्त में शंख नाम वाला वर्त्तमान है ।२७। म्लेच्छ देश में शकों का पति राज्यशासन कर रहा है। आप सब लोग उसके कारण का श्रवण करो जिस प्रकार से जिसकी वृद्धि है ।२८।

द्विसहस्रे कलौ प्राप्ते म्लेच्छवंशविवर्द्धिता ।
भूमिर्म्लेच्छमयी सर्वा नानापथविवर्द्धिता ।२९
ब्रह्मावर्तमृते तत्र सरस्वत्यास्तटं शुभम् ।
म्लेच्छाचार्यश्चमूशाख्यस्तन्मतैः परितः जगत् ।३०

देवार्चनं वेदभाषा नष्टा प्राप्ते कलौ युगे ।
तल्लक्षणं शृणु मुने म्लेच्छभाषाश्चतुर्विधा: ।३१
व्रजभाषा महाराष्ट्री यावनी च गुरुण्डिका ।
तासां चतुर्लक्षविधा भाषाश्चान्यास्तथैव च ।३२
पानीयं च स्मृतं पानी वुभुक्षा भूख उच्यते ।
पानीयं पापडीभाषा भोजनं कक्कनं स्मृतम् ।३३
इष्टिशुक्षरवा प्रोक्त इस्तिर्नी मसपावनी ।
आहुतिर्व आजु इति ददाति च दधाति च ।३४
पितृपैतरभ्राता च बादर: पतिरेव च ।
सेति सा यावनी भाषा ह्यश्वश्चास्पस्तथा पुन: ।३५
जानेस्याते जैनु शब्द: सप्तसिंधुस्तथैव च ।
सप्तहिन्दुर्यावनी च पुनर्ज्ञेया गुरुण्डिका ।३६

जब दो सहस्र वर्ष कलियुग के प्राप्त हो गये तो यहाँ म्लेच्छों के वंश की वृद्धि हुई है। यह समस्त भूमण्डल म्लेच्छों से परिपूर्ण हो गया था और इस वृद्धि के अनेक मार्ग थे ।२६। ब्रह्मावर्त में जहाँ पर सरस्वती नदी का परम शुभ तट है वहाँ पर ही मूसा नाम वाला म्लेच्छों का आचार्य रहता था। उसके मत से समस्त जगत् पूरित हो गया था ।३०। कलियुग के प्राप्त होने पर देवों का अर्चन और वेदों की भाषा यह सब नष्ट हो गये थे। हे मुने ! उसका लक्षण सुनो। म्लेच्छों की भाषा चार प्रकार की है ।३१। व्रजभाषा, महाराष्ट्री भाषा, यावनी भाषा और गुरुण्डिका भाषा ये चार भाषायें हैं। उन चारों की चार लाख प्रकार की भाषायें हैं और उसी भाँति अन्य भाषायें भी हैं ।३२। पनीय को पानी और बुभुक्षा को भूख कहा जाता है। पानीय पापड़ी भाषा और भोजन को कक्कन कहा गया है ।३३। इष्टि शुक्षरव कहा गया है और इस्तिनी का मस पावनी, आहुति को आजु और ददाति को दधाति कहा जाता है ।३४। पितृ को पैतर, भ्राता को बिरादर और पति ही कहा जाता है। वह यावनी भाषा है इसमें अश्व को आस्प कहा जाता है

।३५। जने के स्थान में जैनु शब्द तथा सप्त सिन्धु को सप्त हिन्दू यह यावनी भाषा में कहा जाता है। अब गुरुण्डिका भाषा के विषय में कुछ ज्ञान प्राप्त करना चाहिये ।३६।

रविवारे च सण्डे च फाल्गुन चैव फर्वरी।
षष्टिश्च सिक्सटी तदुदाहारमीदृशम् ।३७
या पवित्रा सप्तपुरा तासु हिंसा प्रवर्त्तते।
दस्यवः शबरा भिल्ला भूर्खा आर्य स्थिता नराः ।३८
म्लेच्छदेशे बुद्धिमंतो नथा वै म्लेच्छ धार्मिणः।
म्लेच्छाधीना गुणाः सर्वेऽवगुणा आर्यदेशके ।३९
म्लेच्छराज्यम् भारते च तद्वीपेषु स्मृतम् तथा।
एवं ज्ञात्वा मुनि श्रेष्ठ हरिं भज महामते ।४०
तच्छ्रुत्वा मुनयः सर्वे रोदनं चक्रिरे बहु ।४१

गुरुण्डिका भाषा में रविवार के स्थान पर 'सण्डे' का प्रयोग होता है और फाल्गुन के स्थान पर 'फरवरी' प्रयुक्त किया करते हैं। षष्टि के स्थान में 'सिक्सटी' होता है। इसी प्रकार के उसके उदाहरण होते हैं सो जान लेने चाहिये ।३७। रे तात परम पवित्र पुरियाँ मानी गई हैं उनमें अब हिंसा की प्रवृत्ति दिखाई देती है। इस आर्यों के देश में दस्युलोग, शवर, भिल्ल, मूर्ख मनुष्य स्थित रहते हैं ।३८। देश में बुद्धिमान मनुष्य भी म्लेच्छों के जैसे धर्मों का आचरण करने वाले होते हैं। समस्त गुण म्लेच्छों के ही वहाँ अधीन होते हैं और इस आर्य देश में सब अवगुण भरे हुये हैं ।३९। भारत में म्लेच्छों का राज्य फैला हुआ है। हे मुनियों में श्रेष्ठ! इस प्रकार से समझकर, हे महामते! हरि भगवान का भजन करना चाहिये ।४०। यह सूतजी का कथन सुनकर मुनियों ने अत्यधिक रुदन किया था ।४१।

।। आर्यावर्त में म्लेच्छों का आगमन ।।

ब्रह्मावर्ते कथं म्लेच्छा न प्राप्ताः कारण वद ।
सूतः प्राह शृणुष्वेदं सरस्वत्याः प्रभावतः ।१
म्लेच्छा:गोप्ता न तत्स्थाने काश्यपो नाम वद्द्विजः ।
कलौ प्राप्ते सहस्राब्दे स्वर्याप्राप्तः सुराज्ञयाः ।२
आर्यावती च तत्पत्नीं दश पुत्रानकश्यपान् ।
काश्यपात्सा लब्धवती तेषां नामानि ये शृणु ।३
उपाध्यायो दीक्षितश्च पाठकः शुक्लामिश्रकौ ।
अग्निहोत्री द्विवेदि च त्रिवेदी पाण्डय एव च ।४
चतुर्वेदीति कथिता नामतुल्यगुणाः स्मृतः ।
तेषां मध्ये काश्यपश्च सर्वज्ञानसमन्वितः ।५
काश्मीरे प्राप्तवान्सोऽपि जगदम्बां सरस्वतीम् ।
तुष्टाव पूजनं कृत्वा रक्तपुष्पैस्तथाक्षतैः ।६
धूपैर्दीपैश्च नैवेद्यैः:पुष्पांजलिसमन्वितः ।७

इस अध्याय में आर्यावर्त्त में म्लेच्छों के आगमन का कारण और काश्यप ब्राह्मणों के वृत्तान्त का वर्णन किया जाता है। शौनक जी ने कहा—ब्रह्मावर्त्त में म्लेच्छ लोग कैसे युक्त नहीं हुये, इसका क्या कारण था, इसे कृपा कर बताइये। सूतजी ने कहा—सुनो, यह सरस्वती नदी के प्रभाव से ही ऐसा हुआ था।१। उस स्थान में म्लेच्छ लोग नहीं पहुँचे थे क्योंकि कश्यप नामधारी द्विज वहाँ पर कलियुग के सहस्र वर्ष हो जाने पर सुरों की आज्ञा से स्वर्ग से प्राप्त हो गया था।२। उस द्विज की पत्नी का नाम आर्यावती था। उसने काश्यप से दश निष्पाप पुत्र को प्राप्त किया था। अब उन दश पुत्रों के नामों का तुम श्रवण करो।३। उपाध्याय, दीक्षित, पाठक, शुक्ल, मिश्र, अग्निहोत्री, द्विवेदी, त्रिवेदी और पाण्डेय ये उन दशों के नाम थे।४। चतुर्वेदी भी एक नाम था जोकि नामों के तुल्य ही गुण वाले थे। उन सब में काश्यप परमज्ञान वाला बुद्धिमान था।५। वह भी फिर काश्मीर में प्राप्त हो गया वहाँ उसने जगदम्बा

सरस्वती का रक्तपुष्प और अक्षतों द्वारा पूजन करके उसे संतुष्ट किया धूप और दीप तथा नैवेद्य के साथ पुष्पांजलि से वह समन्वित था।६।७।

मातः शङ्करदयि ते मथिते करुणा कुतो नास्ति।
भोऽसि त्वं जगदम्बा जगत किं मां बहिर्नयसि।८
देवि त्वं सुरहेतोर्धर्मद्रोहिणमाशु हंसि मातः।
उत्तमसंस्कृतभाषा त्वं कुरु म्लेच्छांश्च मोहयेःशीघ्रम्।९
अम्बा त्वं बहुरूपा हुं कास धूम्रलोचनं हंसि।
भीमं दुर्गा दैत्यं हत्वा जगतां सुखं नयसि।१०
दम्भ मोह घोरं गर्वं हत्वा सदा सुखं शेषे।
वोथय मातर्जगतो दुष्टन्नष्टन्कुरु त्वं वै।
तदा प्रसन्ना सा देवी भो मुनेस्तस्य मानसे।११
वासं कृत्वा ददौ ज्ञानं मिश्रदेशे मुनिर्गतः।
सर्वान्म्लेच्छान्मोहयित्वा कृत्वार्थं तान्द्विजन्मनः।१२
संख्यादशसहस्र च नरवृन्दन द्विजन्मनाम्।
द्विसहस्र स्मृता वैश्याः शेषाः शूद्रसुताः स्मृताः।१३
तैः सार्द्धं मार्यदेशे स सरस्वत्याः प्रसादतः।
अवसद्ध मुनि श्रेष्ठो मुनिकार्यरतः सदा।१४

काश्यप ने कहा—हे माता, हे शङ्कर की पत्नी ! मेरे ऊपर आपकी करुणा क्यों नहीं होती है ? आप तो इस समय जगत् की अम्बा हैं क्या इस जगत् से भी मुझे कहीं बाहर रखना चाहती हैं ? ।८। हे देवी ! हे माता ! आप देवों के हित सम्पादन करने के लिये धर्म के द्रोह करने वाले को शीघ्र ही मार देती हैं। आप सर्वोत्तम संस्कृत भाषा का विस्तार करो और इन म्लेच्छों को शीघ्र ही मोहित कर दो ।९। आप तो एक हुँकार से ही धूम्रलोचन दैत्य का बध कर देती हैं दुर्गा भीम दैत्य का हनन कर जगत् को सुख किया करती हैं ।१०। दम्भ, मोह, घोर गर्व का हनन करके सदा सुख पूर्वक शयन करती हैं। हे माता ! जगत् को ज्ञान प्रदान करो और आप इन समस्त दुष्टों को नष्ट करो इस प्रकार

से स्तवन करने पर उस समय वह देवी परम प्रसन्न हुई और उसने फिर उसी मुनि के मानस में वास करके ज्ञान प्रदान किया था। वह मुनि मिश्र देश को चले गये। समस्त म्लेच्छों को मोहित कर उन्हें द्विजन्मा किया था।११।१२। दस सहस्र नरों का वृन्द था उनमें द्विजन्माओं की संख्या दो सहस्र थी शेष वैश्य थे और शूद्र सुत बताये गये हैं।१३। उनके साथ उस आर्य देश में वह सरस्वती के प्रसाद से वहीं बसा था। यह मुनियों में श्रेष्ठ सदा मुनियों के कार्यों में ही रत रहा करता था।१४।

तेषामार्यं समूहाना देव्याश्च वरदानतः।
वृद्धिर्भवति बहुल चष्कोटिनराः स्त्रियः।१५
तेषां पुत्राश्च तद्भूपः काश्यपो मुनिः।
विंशोत्तरशतं वर्षं तस्य राज्यं प्रकीर्तितम्।१६
राज्यपुत्रा ख्यदेशे च शूद्राश्चाष्टसहस्रकाः।
तेषां भूपश्चार्य पृथुस्तस्माज्जातरस मागधः।१७
मागधं नाम तत्पुत्रमभिषिच्य ययौ मुनिः।
इति श्रुत्वा भृगुश्रेष्ठाः शौनको हर्षमागतः।१८
सूतं पौराणिकं नत्वा विष्णुध्यानपरोऽभवत्।
पुनश्च श्रुतिवर्षान्ते बोधिता मुनयस्तथा।१९
नित्यनैमित्तकं कृत्वा पप्रच्छुरिदमादरात्।
लोमहर्षण मे ब्रूहि के राजानश्च मागधात्।
कलौ राज्यं यैस्तु कृतं यैस्तु व्यासशिष्य वदस्यनः।२०

उन आर्यों के समूहों में देवी के वरदान से वृद्धि बहुत अधिक हुई और चार करोड़ पुरुष तथा स्त्रियाँ थे।१५। उन स्त्री और पुरुषों के पुत्र तथा पौत्र भी थे। उन सबका भूप काश्यप मुनि हुआ था। एक-सौ बीस वर्ष तक उस काश्यप का राज्य शासन करने का काल कहा गया है।१६। राज्य पुत्र नाम वाले देश में आठ सहस्र शूद्र थे और उनका राजा आर्य पृथु था। उससे मागध उत्पन्न हुआ था।१७। उसके पुत्र मागध का राजगद्दी पर अभिषेक करके मुनि चला गया था। यह श्रवण कर भृगु श्रेष्ठ शौनक को परम हर्ष उत्पन्न हुआ था।१८। फिर उसके

पौराणिक सूतजी को प्रणाम करके वह विष्णु के ध्यान में परायण हो गया था और फिर श्रुति वर्ष के अन्त में मुनियों को बोधित किया था ।१९। मुनियों ने अपना नित्य किये जाना वाला और निमित्त को लेकर किये जाने वाला समस्त कर्म पूर्ण करके सूतजी से परम आदर के साथ पूछा था—हे लोमहर्षण ! मागध से कौन राजाओं ने कलियुग में राज्य किया था हे व्यासजी के शिष्य ! आप यह सब बताइए ।२०।

मागधो मागधे देशे प्राप्तवान्काश्यपात्मजः ।२१
पितृराज्यं स्मृतं तेन ग्वायदेशः पृथक्कृतः ।
पांचालात्पूर्वतो देशो मागधः परिकीर्तितः ।२२
आग्नेय्यां च कलिंगश्च तथावान्नस्तु दक्षिणे ।
आनर्तदेशो नैऋत्यां सिंधुदेशस्तु पश्चिमे ।२३
वायव्यां कैकयो देशो मद्रदेशस्तथोत्तरे ।
ईशाने चैव कोणिन्दश्चार्यदेशश्च तत्कृतः ।२४
देशनाम्ना तस्य सुता मगधस्य महात्मनः ।
तेभ्योंशानि प्रदत्तानि तत्पश्चात्क्रतु मुद्वहन् ।२५
बलभद्रस्तदा तुष्टो यज्ञभावेन भावितः ।
शिशुनागः कृतोज्जातो बलभद्रांशसम्भवः ।२६
शतवर्षं कृतं राज्यं काकवर्मा सुतोऽभवत् ।
तद्राज्यं नवतिवर्षं क्षेमधर्मा ततोऽभवत् ।२७
दशहीनं कृतं राज्यं तत्क्षेत्रोजास्तत्सुतोऽभवत् ।
दशहीनं कृतं राज्यं वेदमिश्रस्ततोऽभवत् ।२८

श्री सूतजी ने कहा—काश्यप का पुत्र मागध, मागध देश में प्राप्त हुआ था । उसने पिता के राज्य का स्मरण किया और आर्य देश को पृथक् किया था ।२१। पाँचाल से पूर्व का देश ही मागध देश कहा गया है ।२२। कलिंग देश दक्षिण दिशा में है और अवन्त देश दक्षिण दिशा में है आनर्त्त देश नैर्ऋत कोण में है और सिन्धु देश पश्चिम दिशा में है ।२३। वायव्य कोण में कैकण नाम वाला देश स्थित है तथा मद्र देश उत्तर दिशा में है । ईशान दिशा में कोविन्द देश स्थित है

और आर्य दश तत्कृत है ।२४। उस महात्मा मगध के देश के नाम वाले पुत्र थे । उनके लिये अंश दिये गये थे । इसके पश्चात् उन्होंने क्रतु का उद्वहन किया था ।२५। यज्ञ भाव से परम भावित होकर भगवान बल-भद्र सन्तुष्ट हो गये थे । क्रतु से बलभद्र के अंश से सम्भव शिशु नाग उत्पन्न हुआ था ।२६। उसने एक सौ वर्ष तक राज का शासन किया था । उसका पुत्र काकवर्मी ने जन्म ग्रहण किया । उसका राज्य काल नब्वे वर्ष का था । इसके पश्चात् उसका पुत्र क्षेमधर्मी उत्पन्न हुआ ।२७। इसने अस्सी वर्ष पर्यन्त राज़ शासन किया था फिर उसका क्षेत्रौजा नामधारी पुत्र उत्पन्न हुआ था । इसने अपने पिता के राज काल से दश वर्ष कम राज किया था । इसका पुत्र वेदमिश्र उत्पन्न हुआ था ।२८।

दशहीनं कृतं राज्यं तयोऽजातीरिपुस्सुतः ।
दशहीनं कृतं राज्यं दर्भ कस्तनयोऽभवत् ।२९
दशहीनं कृतं राज्यं मुदयाश्वस्ततोऽभवत् ।
दशहीनं कृतं राज नन्दवर्धन एव तत् ।३०
दशहीनं कृतं राज तस्मान्नंदसुतोऽभवत् ।
पितुस्तुल्यं कृतं राज शूद्रीगर्भसमुद्भवः ।३१
नन्दाज्जातः प्रनन्दश्च दशवर्ष कृतं पदम् ।
तस्माज्जातः परानन्द पितुस्तुल्यं कृतं पदम् ।३२
तस्माज्जातः समानन्दो विंशोशद्वर्ष कृतं पदम् ।
तस्माज्जातः प्रियानन्दः पितुस्तुल्यं कृतं पदम् ।३३
देवानन्दस्तस्त सुतः पितुस्तुल्यं कृतं पदम् ।
यज्ञ भङ्गः सुतस्मात्पितुरर्द्धं पदम् ।३४
मौर्यानन्दस्तस्य सुतः पितुस्तुल्यं कृतं पदम् ।
महानन्दस्ततो जातः पितुस्तुल्यं कृतं पदम् ।३५

वेदमिश्र ने भी पिता से दश वर्ष हीन राज किया था । इसके पश्चात् इसका पुत्र अजाती रिपु हुआ । इनका राज काल दशहीन था । फिर इसके दर्भक नामक पुत्र की उत्पत्ति हुई इसने दशहीन राज किया

था। फिर इससे उदयाश्व का जन्म हुआ। इसका भी दशहीन राज काल था। फिर नन्दवर्धन उत्पन्न हुआ। इसका दश वर्ष कम राज काल था। इससे नन्द सुत की उत्पत्ति हुई जिसने अपने पिता के समान ही राज किया था। यह शूद्री के गर्भ से सम्भूत हुआ था।२६।३१। नन्द से प्रनन्द की उत्पत्ति हुई थी। इसने दश वर्ष ही पद किया था। इससे परानन्द समुत्पन्न हुआ था जिसने कि अपने पिता के समान ही पद किया था अर्थात् राज शासन किया था।३२। इससे समानन्द का जन्म हुआ था जिसने त्रिशोशद्वर्ष पर्यन्त राज किया था। इससे प्रिया-नन्द ने जन्म ग्रहण किया था जिसने अपने पिता के बराबर ही पद किया था।३३। फिर देवानन्द उसका पुत्र उत्पन्न हुआ था। इसने पिता के तुल्य ही राज किया था। उसका आत्मज यज्ञ भंग नामक हुआ था जिसने अपने पिता से आधे समय तक पद सम्भाला था।३४। इसके मौर्यानन्द नामधारी पुत्र ने जन्म ग्रहण किया था जिसने बिल्कुल अपने पिता के तुल्य ही पद किया। उससे फिर महानन्द समुत्पन्न हुआ जिसका राज काल अपने पिता के तुल्य ही हुआ था।३५।

एतस्मिन्नेव काले तु कलिना संस्मृतो हरिः।
काश्यपादुद्भवो देवो गौतमो नाम विश्रुतः।३६
बौद्धधर्मं च संस्कृत्य पंट्टिणे प्राप्तवान्हरिः।
दशवर्षं कृतं राज्यं तस्माच्छाक्यमुनिः स्मृतः।३७
विशद्वर्षं कृतं राज्यं तस्माच्छुदधदनोऽभवत्।
त्रिशद्वर्यं कृतं राज्यं शाक्यसिंहस्ततोऽभवत्।३८
शताद्रो द्विसहस्रेऽब्दे व्यतीते सोऽभवन्नृपः।
कलेः प्रथमचरणे वेदमार्गो विनाशितः।३९
षष्ठिवर्षं कृतं राज्यं सर्वं बौद्धा नराः स्मृताः।
नरेषु बिष्णुर्नृपतिर्यथा राजा तथा प्रजाः।४०
विष्णोर्वीर्यानुसारेण जगद्धर्मः प्रवर्त्तते।
तस्मिन्हरौ ये शरणं प्राप्ता मायापतौ नराः।४१

अपि पापसमाचारा मोक्षवंतः प्रकीर्तिताः ।
शक्यसिंहाद्बुद्धसिंहः पितुरर्द्धं कृतं पदम् ।४२

इसी काल में कलि ने हरि का स्मरण किया । काश्यप से उद्भाव देव गौतम नाम से प्रसिद्ध हुये ।३६। ये बौद्ध धर्म का संस्कार करके हरिपट्टण में प्राप्त हुये । दश वर्ष पर्यन्त वहाँ राज किया और फिर उनसे शाक्य मुनि स्मृत हुये ।३७। इन्होंने बीस वर्ष तक राज किया था इनसे शुद्धोदन हुये। इन्होंने तीस वर्ष तक राज किया था । इनसे शाक्य सिंह समुद्भूत हुए ।३८। शताब्दि में दो सहस्र वर्ष व्यतीत हो जाने पर वह नृपति हुए थे । कलि के प्रथम चरण में ही वेद का जो भार्ग था वह विनाशित हो गया था ।३९। इस तरह इन समस्त बौद्ध नरों ने साठ वर्ष तक राज किया था और ये नर कहे गए हैं । नरों में विष्णु ऐसे नृपति थे कि जैसे राजा थे वैसी ही प्रजा भी थी ।४०। विष्णु के वीर्य के अनुसार से ही जगद्धर्म प्रवृत्ति होती है ।। उस हरि के जो शरण में प्राप्त हुए हैं जो कि हरि माया के प्रति हैं, वे नर पापाचरण करने वाले भी हैं तो भी हरि की शरणगति के प्रभाव से मोक्ष वाले कहे गए हैं । शाक्य सिंह से बुधसिंह हुआ जिसने अपने पिता से आधे समय तक ही राज किया था ।४१।४२।

चन्द्रगुप्तस्तस्य सुता पौरसाधिपतेः सुताम् ।
सुलुवस्य तथोद्वाह्य यावनीबौद्धतत्परः ।४३
षष्ठिवर्षं कृतं राज्यं विन्दुसारस्ततोऽभवत् ।
पितुस्तुल्यं कृतं राज्यमशोकस्तनयोऽभवत् ।४४
एतस्मिन्नेव काले तु कान्यकुब्जो द्विजोत्तमः ।
अर्बुदं शिखरं प्राप्य ब्रह्महोममथाकरोत् ।४५
वेदमंत्रप्रभावच्च जाताश्चत्वारिक्षत्रिया ।
प्रमरस्सामवेदी च चपहानियजुर्विदः ।४६
त्रिवेदी च तथा शुक्लोथर्वा स परिहारकः ।
ऐरावतकुले जातान्गजानारुह्यते पृथक् ।४७

अशोकं स्ववशं चक्रुस्सर्वे बौद्धा विनाशिताः।
चतुर्लक्षाः स्मृता बौद्धाः दिव्यशस्त्रैः प्रहारिताः ।४८
अवन्ते प्रमरो भूपश्चतुर्योजनविस्तृताम्।
अम्बावतीं नाम पुरीमध्यास्य सुखितोऽभवत् ।४९

इसके पुत्रों का नाम चन्द्रगुप्त था जिसने पौरसाधिपति सुलूव की पुत्री के साथ विवाह किया था और यावनी बोध तत्पर हो गया था। इसने साठ वर्ष पर्यन्त राज का शासन किया था। इसके विन्दुसार नामक पुत्र उत्पन्न हुआ था। इसने पिता के तुल्य ही राज किया था। इसके अशोक समुत्पन्न हुआ था ।४३।४४। इसी समय में कान्यकुब्ज द्विज श्रेष्ठ ने अबुर्द के शिखर पर जाकर ब्रह्म होम किया था ।४५। वेदों में मन्त्रों के प्रभाव से चार क्षत्रिय उत्पन्न हुए थे। प्रमर, साम वेदी, चपहानि और यजुर्वेदि। और त्रिवेदी तथा शुक्ल अथवा वह परिहारक था। इनके द्वारा ऐरावत के कुल में उत्पन्न गजों पर पृथक् आरोहण किया जाता था ।४६।४७। इन्होंने अशोक को अपने वश में कर लिया था और समस्त विनाशित कर दिए थे। चार लाख की संख्या में बोध बताए गए हैं। ये सभी दिव्य शस्त्रों के द्वारा प्रहारित कर दिये थे ।४८। अवन्ति देश में प्रमर भूप था जो चार योजन के विस्तार वाली अम्बावती नाम की पुरी में अधिष्ठित होकर बहुत ही सुखित हुआ था ।४९।

★

।। कलिंजर अजमरपुर आदि वर्णन ।।

चित्रकूटगिरेर्देशे परिहारो महीपतिः ।
कलिंजरपुरं रम्यमक्रोशायतनं स्मृतम् ।१
अध्यास्य बौद्धहता सुखितोमवर्द्जितः ।
रोजंपुत्राख्यदेशे च चपहानिर्महीपति ।२
अजमरपुरं रम्यं विधिशोभासमन्वितम् ।
चतुर्वर्ण्ययुतं दिव्यमध्यास्य सुखितोऽभवत् ।३
शुक्लो नाम महिपालो गत आनर्तमण्डले ।
द्वारकां नाम नगरीमध्यास्य सुखितोऽभवत् ।४
तेषामग्न्यु द्भवानां च ये भूपा राज्यसत्कृताः ।
तान्मे ब्रू हि महाभाग सूतो वाक्यथाब्रवीत् ।५
गच्छध्वं ब्राह्मणाः सर्वे योगनिद्रावशो ह्यहम ।
तच्छ्रु त्वा नुनयः सर्वे विष्णोर्ध्यानं प्रचक्रिरे ।६
पूर्णे द्वे च सहस्रान्ते सूतोवचनमब्रवीत् ।
सप्तत्रिंशशते वर्षे दशाब्दे चाधिके कलौ ।७

इस अध्याय में कलिंजपुर, आजमपुर और द्वारिका नगरियों में प्रमर चपहानि तथा शुक्लों की स्थित का वर्णन किया जाता है। श्री सूतजी ने कहा—चित्रकूट गिरि के देश में परिहार नाम वाला राजा था। वहाँ कलिंजपुर परम रम्य और अक्रोशायतन कहा गया है।१। वह बौद्धों का हनन करने वाला वहाँ निवास करके ऊर्जित सुखित हुआ था। और राजपुत्र नामक देश में चपहानि महीपति हुआ था।२। अजमपुर अत्यन्त रमणीक था जो विधि शोभा से पूर्ण तथा समन्वित यह पुर चारों वर्णों से युक्त एव दिव्य था। इसमें निवास करके परम सुखित हुआ था।३। शुक्ल नामधारी राजा आनर्तमण्डल में चला गया था। वह द्वारका नाम नगरी में निवास करके परम सुखित हुआ था।४। शौनक ने कहा—उस अग्नि से उद्भवों के राजा राज्य सत्कृत थे, हे महाभाग ! आप उनके विषय में हमको बतलाइये। सूत जी ने यह

वचन कहा—हे ब्राह्मणो ! अब आप चले जाओ। मैं योगनिन्द्रा के वशीभूत हो गया हूँ। यह सुनकर समस्त मुनियों ने भगवान् विष्णु का ध्यान किया था।५-६। पूर्ण दो सहस्र वर्ष के अन्त हो जाने पर सूतजी ने यह वचन कहे—सैंतीस सौ दस कलियुग के अधिक हो जाने पर प्रवर नामक राजा ने छै: वर्ष तक राज्य किया था।७।

प्रमरो नाम भूपालः कृतः राज्यं च षट्समाः।
महामदस्ततो जातः पितुरर्धं कृतं पदम्।८
देवापिस्तनयस्तस्य पितुस्तुल्यं कृतं पदम्
देवदूतस्तस्य सुतः पितुस्तुल्यं स्मृत पदम्।९
तस्माद्गन्धर्वसेनश्च पंचाशब्दभूपदम्।
कृत्वा च स्वसुतं शंखमभिषिच्य वनं गतः।१०
शंखेन तत्पदं प्राप्तं राज्यं त्रिंशत्समाः कृतम्।
देवांगना वीरमती शक्रेण प्रेषिता तदा।११
गंधर्वसेनं सम्प्राप्य पुत्ररत्नमजनत्।
सुतस्य जन्मकाले तु नभसः पुष्पवृष्टयः।१२
पेतुदुर्दुभयोनेदुर्वाति वाताः सुखप्रदाः।
शिवदृष्टिर्द्विजो नाम शिष्यैस्साद्धं वनं गतः।१३
विशद्भिः कर्मयोगं च समाराध्य शिवोऽभवत्।
पूर्णे त्रिशच्छते वर्षे कलौ प्राप्ते भयंकरे।१४

इससे महामद नामक पुत्र की उत्पत्ति हुई जिसने अपने पिता के समय से आधे समय तक ही पद किया था।८। उसका पुत्र देवापि हुआ जिसने अपने पिता के समान ही राज्य किया था। इसका पुत्र देवदूत नामधारी उत्पन्न हुआ था। इसने पितृतुल्य ही पद किया था। इससे गन्धर्वसेन की उत्पत्ति हुई थी। इसका राज्यकाज पचास वर्ष पर्यन्त रहा था। इस राजा ने अपने पुत्र शंख का राज्यासन पर अभि-

षेक किया ।तथावनमें प्रस्थान किया था ।६।१०।राजा शंख ने तीस वर्ष पर्यन्त राज्य किया था। उस समय वीरमती नाम वाली एक देवांगना इन्द्र के द्वारा वहां प्रेषित की गई थी ।११। उसने गन्धर्वसेन के साथ रहकर एक पुत्ररत्न को जन्म दिया था। इस पुत्र का जिस समय जन्म भूमण्डल में हुआ था उस समय आकाश में पुष्पों की वर्षा हुई थी ।१२ दुन्दुभियाँ वजने लगी थी और परम सुख प्रदान करने वाली वायु वह रही थी। इसका नाम शिवदृष्टि द्विज था जोकि अपने शिष्यों के साथ वन में चला गया था ।१३। वहां बीस वर्ष पर्यन्त इसने कर्मयोग का साधन किया था। इस समय तीन हजार वर्ष भयंकर कलियुग के प्राप्त हो गये थे ।१४।

शकानां च विनाशार्थमार्यधर्म विवृद्धये ।
जातश्शिवाज्ञया सोऽपि कैलासादगुह्यकालयत् । १५
विक्रमादित्यनामानं पिता कृत्वा मुमोदह ।
स वालोऽपि महाप्राज्ञः पितृमातृप्रियंकरः । १६
पञ्चवर्षे वयः प्राप्ते तपसोऽर्थे वनं गतः ।
द्वादशाब्दं प्रयत्नेन विक्रमेण कृतः तपः । १७
पश्चादम्बावती दिव्य पुरीं यातः श्रियान्वित ।
दिव्यं सिंहासनं रम्यं द्वात्रिंशन्मूर्तिसंयुतम् । १८
शिवेन प्रेषितं तस्मै सोपि तत्पदमग्रहीत् ।
वैतालस्तस्य रक्षार्थं पार्वत्या निर्मितो गतः । १९
एकदा स नृपो वीरो महाकालेश्वरस्थलम् ।
गत्वा संपूजयामास देवदेवं पिनाकिनम् । २०
सभा धर्ममयी तत्र निर्मिता व्यूहविस्तरा ।
नानामतुकृतस्तम्भा नानामणविभूषिता । २१

शकों के विनाश करने के लिए और आर्यों के धर्म की वृद्धि करने के लिए वह भी गुह्यकों के आलय कैलाश से शिव की आज्ञा प्राप्त कर

ही यहां समुत्पन्न हुआ था ।१५। पिता ने इसका नाम विक्रमादित्य रक्खा था और उसे परम हर्ष हुआ था। वह बाल्य अवस्था में ही महान् बुद्धिमान पण्डित हुआ था और अपने माता पिता का अत्यन्त प्रियङ्कर था ।१६। जब इसकी पांच वर्ष की आयु हो गई थी तभी वह तपस्या करने के लिए बन में चला गया था। वहां इस विक्रमादित्य ने बड़े ही प्रयत्न से तप किया था।१७। इसके अनन्तर वह श्रीसे समन्वित होकर उस दिव्य अम्बावती पुरी में गया था। एक परम सुन्दर एवं दिव्य बत्तीस मूर्तियों से युक्त सिंहासन उसके लिए शिव ने भेजा था और उसने उसे ग्रहण किया था। उसकी रक्षा करने के लिए पार्वती ने वेताल को निर्मित करके प्रेषित किया था ।१८।१९। एक बार वहपरम वीर राजा महाकालेश्वर के स्थल पर जाकर देवों के भी देव भगवान पिनाकी की पूजा करने को गया था ।२० वहाँ पर व्यूह विस्तार वाली एक धर्ममयी सभा का निर्माण किया था जिनमें अनेक धातुओं के स्त-म्भ बनाये गये थे जो कि विभिन्न तरह की मणियों से विभूषित किए गये थे ।२१

नानाद्रु मलताकीर्णा पुष्पवल्लीभिरन्विता ।
तत्र सिंहासनं दिव्य स्थापितं तेन शौनक । २२
आहूय ब्राह्मणान्मुख्यान्वेदवेदांगपारगान् ।
पूजयित्वा विधानेन धर्मगाथामथाऽश्रृणोत् । २३
एतस्मिनन्तरे तन् वैतालो नाम देवता ।
स कृत्वा ब्राह्मणं रूपं जयाशीर्भिः प्रशस्ततम् । २४
उपविश्यासने विप्रो राजनमिदमब्रवीत् ।
यदि ते श्रवणे श्रद्धा विक्रमादित्यभूपते । २५
वर्णयामि महाख्यानमितिहाससमुच्चयम् । २६

यह सभा अनेक प्रकार के वृक्षों से समाकीर्ण थी और विभिन्न पुष्पों से समन्वित बल्लियों से युक्त थी। हे शौनक ! वहां पर ही वह

दिव्य सिंहासन उसने स्थापित किया था। २२ वेदों और वेद के अंग शास्त्रों के महामनीषियों एवं पारङ्गत पण्डित मुख्य ब्राह्मणों का वहां समाह्वान करके उनकी पूजा की और विधि-विधान से उसने धर्म की गाथाओं का वहां श्रवण किया था।२३। इसी बीच में वहाँ पर वैताल नाम वाले देवता ने ब्राह्मण का रूप धारण करके जय के आर्शीवादों से उसकी प्रशंसा की थी।२४। वह विप्र आसन पर स्थित होकर राजा से यह बोला—हे विक्रमादित्य नृप ! यदि आपकी श्रवण करने में बहुत ही श्रद्धा हैं तो मुझसे श्रवण करो, मैं एक इतिहासों के समुच्च स्वरूप महान आख्यान का वर्णन करता हूँ। २५-२६।

पद्मावती कथा वर्णनम्

इत्युक्तस्स तु वैतालो महाकालेश्वरस्थितः।
शिवं मनसि संस्थाप्य राजानमिदब्रवीत्। १
विक्रमादित्यभूपाल शृणु गाथा मनोरमाम्।
वाराणसी पुरी रम्या महेशो यत्र तिष्ठति। २
चातुर्वर्ण्यप्रजा यत्र प्रतापमुकुटो नृपः।
महादेवी च महिषी धर्मज्ञस्य महोपतेः। ३
तत्पुत्रो वज्रमुकुटो मंत्रिणः सुतबल्लभाः।
षोडशाब्देऽथ संप्राप्ते हयारूढो वनं गतः।४
अमात्यतनयश्चैव बुद्धिदक्ष इति श्रुतः
हयारूढो गतः सार्धं समानवयसा वने।५
स दृष्ट्वा विपिनं रम्यं मृगपक्षिसमन्वितम्।
मुमोद वज्रमुकुटः कामाशयवशं गतः।६
तत्र दिव्यं सुरो रम्यं नानापक्षिनिनादितम्।
तस्य कूले शिवस्थानं मुनिवृन्दैः प्रपूजितम्।७

इस अध्याय में पद्मावती की कथा का वर्णन किया जाता हैं। श्री सूतजी ने कहा—इस प्रकार से कहे गये वैताल ने जोकि महा कालेश्वर

में स्थित था, भगवान शिव को मन में संस्थापित करके राजा से वह वचन बोले—।१। हे भूपाल विक्रमादित्य ! अव तुम एक परम मनोरम गाथा का श्रवण करो। वाराणसी पुरी बहुत ही रम्य है जहां कि महेश स्वयं स्थित रहा करते हैं ।२। वहाँ प्रजा में चारों वर्णों के लोग हैं और वहां का प्रताप मुकुट नाम वाला राजा था। इस धर्म के ज्ञाता महीपति की महादेवी नाम वाली रानी थी ।३। उसके पुत्र का नाम व्रजमुकुट था और उसके मन्त्रीगण उस सुत के परम प्रिय थे। जव वह वज्रमुकुट सोलह वर्ष की आयु वाला हो गया तो उस समय अश्व पर आरोहण करके वन को गया था ।४। अमात्य (मन्त्री) का पुत्र बुद्धिदक्ष था, वह भी अश्व पर आरूढ़ होकर साथ ही वन को गया था। ये दोनों समान सी उम्र वाले थे ।५। उस राजकुमार ने मृग पक्षियों से समन्वित सुन्दर वन को देखा और परम प्रसन्नता प्राप्त की थी। वहां फिर वह वज्रमुकुट नामक राजकुमार कामाशय वशीभूत हो गया था ।६। वहाँ वन में एक अत्यन्त रम्य एवं परम दिव्य सरोवर था जोकि विभिन्न प्रकार के सुन्दर पक्षियों के निषाद से युक्त हो रहा था। उस सरोवर के तट पर एक भगवान शिव का स्थान था जो कि मुनियों के समूहों के द्वारा पूजित था। ७।

दृष्ट्वा तत्र गतौ वीरौ परमानन्दमापतुः ।
एतस्मिन्नन्तरे भूह कर्णाटक भूपतेः ।८
दंतवक्त्रस्य तनया नाम्ना पद्मावती मता ।
कामदेवं नमस्कृत्य कामिनी कामरूपिणी ।९
चिक्रीड सखिभिः क्रीडां सरोमध्ये मनोहरा ।
तदा तु वज्रमुकुटो मन्दिरादागतो वहिः ।१०
दृष्ट्वा पद्मावतीं वालां तुल्यरूपणान्विताम् ।
मूर्छितः पतितो भूमौ सा दृष्ट्वा तु सुमोहवै ।११
प्रबुद्धो वज्रमुकुटो मां पाहि शिवशंकर ।
इत्युक्त्वा भूपतनयः पुनर्वालां ददर्श ह ।१२

शिरसः पद्मकुसुम सा गृहीत्वा तु कर्णयोः ।
कृत्वा चखान दशनैः पादयोर्दधती पुनः ।१३
पुनर्गृ हीत्वा तत्पुष्प हृदये सम्प्रवेशितम् ।
इति भावं च सा कृत्वाऽऽलिभि साध्र ययो गृहम् ।१४

उस शिवालय को देखकर वह दोनों युवक वहां पहुंच गये और उन वीरों को परम अधिक आनन्द की प्राप्ति हुई थी । हे भूप ! इसी बीच में वहां पर करणाटक के राजा दन्तवक्त्र की पदमावती नामवाली पुत्री वहां आई । वह कामिनी कामरूपिणी थी । उसने कामदेवको नमस्कार किया और परम सुन्दरी वह अपनी सखी-सहेलियों के साथ उस सरोवर के मध्य में क्रीड़ा करने लगी । उस समय में राजकुमार वज्रमुकुट मन्दिर से बाहर आ गया था ।८।१०। उसने गुण और रूप में समान उस मदमाबाला को देखा तो वह मूर्च्छित होकर भूमि पर गिर गया था । वह पदमावती भी उसे देखकर अत्यन्त मोहित हो गई थी ।११। कुछ क्षण के पश्चात जब वज्रमुकुट को होश हुआ तो वह प्रबुद्ध होकर कहने लगा—हें शिवशंकर ! मेरी रक्षा करो । इतना कहकर वह फिर बाला को देखने लगा ।१२। उस बाला ने शिर से पद्म के पुष्प को लेकर कानों में किया और फिर पादों में करती हुई दशनों में चाखा था और फिर उस पुष्प को लेकर हृदय में प्रवेशित कर लिया था । इस प्रकार के भाव को उसने करके वह फिर अपनी सखियों के साथ गृह को चली गई थी ।१३।१४।

तीर्थार्थिं च समं पित्रा संप्राप्ता गिरिजावने ।
तस्यां गतयां स नृपो मारवाणेन पीडितः ।१५
महती मानसी पीडां प्राप्तवान्मोहमागतः ।
उन्मादीव ततो भूत्वा खाद्यपानविवर्जितः ।१६
ध्यात्वा पद्मावती बालां मौनव्रतमचीकरत् ।
तदा कोलाहलो जातः प्रतापमुकुटांतिके ।१७

कुमारः कां दशां प्राप्त इति हाहेति सर्वतः ।
त्रिदिनाते मंत्रि सुतो बुद्धि दक्षो विशारदः ।१८
अब्रवीद्वज्रमुकुटं सत्यं कथय भूपते ।
स आह कारणं सर्वं यथा जातं सरोवरे ।१९
तच्छ्रुत्वा बुद्धिदक्षश्च विहस्याह महीपतिम ।
महाकष्टेन स देवी मित्रत्वं हि गमिष्यिति ।२०
कर्णाटकभूपस्य दंतवक्त्रस्त सा सुता ।
पद्मावतीति विख्याता दधती त्वां स्वमानसे ।२१

फिर तीर्थों के लिये पिता के साथ गिरिजा के वन में प्राप्त हुई थी उसके चले जाने के बाद वह नृप काम के बाण से अत्यन्त पीड़ित हो गया था ।१५। बड़ी भारी मानसिक पीड़ा को वह प्राप्त हो गया और उसे मोह हो गया था । इसके पश्चात् एक उन्माद के रोगी की भाँति हो गया था जिसने अपना खाना-पीना सभी का त्याग कर दिया था । ।१६। उसे केवल पद्मावती बाला का ही ध्यान रहा करता था और उसका ध्यान करके वह अहर्निश मौन व्रत में रहता था । तब तो इस बात का प्रताप मुकुट के समीप में बड़ा कोलाहल हो गया था ।१७। कुमार की यह क्या दशा हो गई, इसके लिए सभी ओर बड़ा हाहाकार मच गया था । तीन दिन के बाद मन्त्री के पुत्र परम पण्डित बुद्धिदक्ष ने वज्रमुकुट से कहा—हे भूपते ! सत्य-सत्य बताओ क्या कारण है । तब तो राजकुमार ने समस्त कारण उसे बता दिया था जो कि वन में उस,सरोवर में उपस्थित हुआ था ।१८।१९। यह सुनकर बुद्धिदक्ष हँसकर महीपति से कहने लगा—वह महादेवी तो बहुत कष्ट से मित्रता को प्राप्त होगी ।२०। वह करणाटक देश के राजा दन्तवक्र की पुत्री है । उसका नाम पद्मावती है । वह तुमको अपने मन में धारण किए हुए है ।२१।

पुष्पभावेन ज्ञात्वाहं त्वां नयामि तदंतिके ।
इत्युक्त्वा तस्य पितरं प्रतापमुकुटं प्रति ।२२

आज्ञाहां देहि भूपाल यास्येहं करणाटके ।
त्वत्सुतस्य चिकित्सार्थं स वज्रमुकुटोऽचिरम् ।२३
आयामि नाऽत्र सन्देहो यदि जीवयसे सुतम् ।
तथेति मत्वा नृपः प्रादात्पुत्रं च मन्त्रिणे ।२४
हयारूढौ गतौ शीघ्रं दन्तवक्त्रस्त पत्तने ।
काचिद्वृद्धा स्थिता तत्र तस्या गेहं च तौ गतौ ।२५
बहुद्रव्यं ददौ तस्यै बुद्धिदक्षो विशारदः ।
ऊषतुर्मेदिरे तस्मिन्रात्रि घोरत मोवृताम् ।२६
प्रातःकाले तु सा वृद्धा गच्छती राजमन्दिरम् ।
तामाह मन्त्रित नयः शृणु मातर्वचो मम ।२७
पद्मावतीं च संप्राप्यैकांते मद्वचनं वद ।
ज्येष्ठशुक्लस्य पञ्चम्यायामिन्दुवारे सरोवरे ।२८
यो दृष्टः पुरुषो रम्य स्त्वदर्थे समुपागतः ।
इति श्रुत्वा ययौ वृद्धा पद्मन्न तस्यै न्यवेदयत् ।२९

मैं पुष्पभाव से जानकर तुमको उसके समीप ले जाता हूँ। इतना बुद्धिदक्ष ने कहकर फिर उस राजकुमार के पिता वज्रमुकुट ने कहा—हे भूपाल ! आप आज्ञा दीजिए, मैं करणाटक देश को जाऊँगा। मेरा यही गमन आपके पुत्र की चिकित्सा के लिए है। वह वज्रमुकुट और मैं शीघ्र ही वहां से आते हैं इसमें कुछ भी सन्देह नहीं है। यदि आप पुत्र को जीवित रखना चाहते हैं तो वहाँ जाने की आज्ञा दे देवें। इसे स्वीकार करके उस राजा ने पुत्र को मन्त्री के सुपुर्द कर दिया था।२२। २४। ये दोनों अश्वों पर आरूढ़ होकर शीघ्र ही राजा दन्तवक्त्र के नगर में पहुंचे। वहां पर कोई एक वृद्धा स्त्री थी। वे दोनों उसके घर में चले गये थे।२५। परम पण्डित बुद्धिदक्ष ने बहुत सारा धन उस वृद्धा को दिया था और उस मन्दिर में उस घोर अन्धकार वाली रात्रि में निवास किया।२६। प्रातःकाल जब हुआ तो वह वृद्धा राजमन्दिर में जाने को

थी । उस समय मन्त्री के पुत्र बुद्धिदक्ष ने उससे कहा—हे माता ! मेरी बात सुनो, तुम पद्मावती के पास जाकर एकान्त में मेरा वचन उससे कह देना कि ज्येष्ठ मास के शुक्ल पक्ष की पञ्चमी तिथि में चन्द्रवार के दिन सरोवर पर जो रम्य पुरुष तुमने देखा था वह तुम्हारे लिए यहां उपस्थित हो गया। यह सुनकर वृद्धा चली गई थी और उसने यह वृत्तान्त उन पद्मावती से कह दिया था ।२७-२६।

स्पष्टा पद्मवती प्राह चन्दनाद्रांगुलीयिका ।
गच्छ गच्छ महादुष्टे तलेनोरस्यताडयेत् ।३०
अंगुलीभि कपोलौ च तस्या स्पष्ट्वा ययौ गृहम् ।
सा तु वृद्धा बुद्धिदक्षं सार्वं भावं न्यवदयत् ।३१
समित्रं दुःखितं प्राह श्रृणु मित्र वचं त्यज।३२
त्वमाह भूपतेः कन्या प्राणप्रिय वचः श्रृणु ।३२
त्वदर्थे ताडितं वक्षः कदा मित्रं भविष्यसि ।
श्रुत्वा तन्मधुरं वाक्यं रजो देहे समागतम् ।३३
रजस्वलांके भो मित्रतवास्कं वितास्म्यहम् ।
इति श्रुत्वा भूपसुतः परमानन्दमाययौ ।३४
त्रिदिनांते तुसा वृद्धा पदमावत्यं न्यवेदयत ।
त्वामुत्सुकः स भूपालस्तव दर्शनवालसः ।३५

चन्दन से आर्द्र अंगुलीयक वाली पद्मावती रुष्ट होकर बोली—हे महादुष्टे ! आ जा, उसने तल से उपःस्थल में ताड़ना की थी ।३०। अंगुलियों से उसके कपोलों को छूकर गृह को चली गई थी । फिर उस वृद्धा ने आकर बुद्धिदक्ष का उसका सम्पूर्ण भाव निवेदन कर दिया था ।३१। वह बुद्धिदक्ष अपने दुःखित मित्र से कहने लगा—हे मित्र ! सुनो अब आप चिन्ता का त्याग कर दो राजा की कन्या ने तुमसे कहा है कि हे प्राणप्रिय ! मेरा वचन श्रवण करो । तुम्हारे लिए ही मैंने तेरा वक्षः-स्थल ताड़ित किया है कि कब मित्र बनोगे । उसका मधुर वाक्य सुनकर

देह में रज की प्रवृत्ति की गई थी ।३३। उसने कहा था कि रजस्वला के अन्त हो जाने पर हे मित्र ! मैं तुम्हारे मुख का चुम्बन करूँगी । यह सुनकर राजा के पुत्र को परमाधिक आनन्द प्राप्त हुआ था ।३४। जब तीन दिन व्यतीत हो गये तो उस वृद्धा ने पद्मावती के समीप में जाकर निवेदन किया कि वह भूपाल तुम्हारे लिए उत्सुक हो रहा है और तुम्हारे दर्शन की उसको बहुत अधिक लालसा है ।३५।

तं भजस्वाद्य सुश्रोणि सफलं जीवनं कुरु ।
इति श्रुत्वा महाहृष्टा सा मस्याद्राँगुलीयकम् ।३६
गवाक्षद्वारि निस्कास्य तले पृष्ठे च ताड़िता ।
तथैव वृद्धा तं प्राप्य मंत्रिणं चाब्रवीद्वचः ।३७
प्रसन्नो बुद्धिदक्षश्च मित्रं प्राह शृणुष्वभोः ।
पश्चिमे दिशि भाः स्वामिन्गवाक्षं तव निर्मितम् ।३८
अर्द्धं रात्रे तु संप्राप्य भज मां कामविह्वलाम् ।
श्रुत्वा तद्वज्रमुकुटः प्रियःदर्शनलालसः ।३९
ययौ शीघ्रं महाकामी रमणो तामरामयत् ।
मासांते कामशिथिलो मित्रदर्शनलालसः ।४०
पद्मावती प्रियां शृणु वाक्यं वरानने ।
येन प्राप्तवती मह्यं त्व सुभ्रूः सुरदुर्लभा ।४१
तन्मित्रं बुद्धिदश्च किं नु तिष्ठिति सांप्रतम् ।
आज्ञां देहि प्रिये मह्यं दृष्ट्वायास्यामि तेऽतिकम् ।४२

हे सुश्रोणि ! तुम आज उस राजकुमार का सेवन करो और अपना जीवन सफल बनाओ । यह सुनकर वह अत्यधिक हर्षित हुई और उसने मसी से आर्द्र अंगुलीयक को गवाक्ष के द्वार में निकालकर तल में और पृष्ठ में ताड़ित किया था । उसी प्रकार से वृद्धा ने मन्त्री के पास आकर कहा-।३६-३७। तब तो बुद्धिदक्ष परम प्रसन्न होते हुए मित्र से बोला—हे राजकुमार ! सुनो, हे स्वामिन् ! उसने पश्चिम दिशा में तुम्हारा

गवाक्ष बना दिया है।३८। आधी रात में तुम वहाँ जाकर उस काम विह्वला का सेवन करो। यह सुनकर वज्रमुकुट प्रिया के दर्शन की लालसा से पूर्ण हो गया था।३९। वह राजकुमार शीघ्र ही वहाँ गया और उस महाकामी ने उस रमणी को खूब रमण कराया था। जब एक मास पूर्ण हो गया तो वह काम से शिथिल हो गया और मित्र के दर्शन करने की लालसा वाला हुआ।४०। तब वह राजकुमार वज्रमुकुट पद्मावती से बोला—हे वरानने ! मेरा वचन श्रवण करो जिसके द्वारा तुम देवों की दुर्लभा सुभ्रु, मुझे प्राप्त हुई हो वह मेरा मित्र बुद्धिदक्ष है। यह देखना है कि वह अभी तक वहाँ ठहरा है या नहीं, तुम मुझे आज्ञा दो, हे प्रिये ! मैं उससे मिलकर शीघ्र ही तुम्हारे समीप आ जाऊँगा।४१-४२।

इति श्रुत्वा वचनस्तस्य निष्ठुरं कुलिशोपमम् ।
